श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री सुदर्शन संहितायां

# ॥ श्री अमृतसञ्जीवनस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री अमृतसञ्जीवनस्तोत्रम् ॥

अथापरमहं वक्ष्येऽमृतसञ्जीवनं स्तवम्।
यस्यानुष्ठानमात्रेण मृत्युर्दूरात्पलायते॥ १ ॥

असाध्याः कष्टसाध्याश्च महारोगा भयङ्कराः।
शीघ्रं नश्यन्ति पठनादस्यायुश्च प्रवर्धते॥ २ ॥

शाकिनीडाकिनीदोषाः कुदृष्टिग्रहशत्रुजाः।
प्रेतवेतालयक्षोत्था बाधा नश्यन्ति चाखिलाः॥ ३ ॥

दुरितानि समस्तानि नानाजन्मोद्भवानि च।
संसर्गजविकाराणि विलीयन्तेऽस्य पाठतः॥ ४ ॥

सर्वोपद्रवनाशाय सर्वबाधाप्रशान्तये।
आयुः प्रवृद्धये चैतत् स्तोत्रं परममद्भुतम्॥ ५ ॥

बालग्रहाभिभूतानां बालानां सुखदायकम्।
सर्वारिष्टहरं चैतद्बलपुष्टिकरं परम्॥ ६ ॥

बालानां जीवनायैतत् स्तोत्रं दिव्यं सुधोपमम्।
मृतवत्सत्वहरणं चिरञ्जीवित्वकारकम्॥ ७ ॥

महारोगाभिभूतानां भयव्याकुलितात्मनाम्।
सर्वाधिव्याधिहरणं भयघ्नममृतोपमम्॥ ८ ॥

अल्पमृत्युश्चापमृत्युः पाठादस्य प्रणश्यति।
जलाग्निविषशस्त्रारिनखिशृङ्गिभयं तथा॥ ९ ॥

गर्भरक्षाकरं स्त्रीणां बालानां जीवनप्रदम्।
महारोगहरं नृणामल्पमृत्युहरं परम्॥ १० ॥

www.prapatti.com

बाला वृद्धाश्च तरुणा नरा नार्यश्च दुःखिताः।
भवन्ति सुखिनः पाठादस्य लोके चिरायुषः॥ ११ ॥

अस्मात्परतरं नास्ति जीवनोपाय ऐहिकः।
तस्मात्सर्वप्रयत्नेन पाठमस्य समाचरेत्॥ १२ ॥

अयुतावृत्तिकं वाथ सहस्रावृत्तिकं तथा।
तदर्धं वा तदर्धं वा पठेदेतच्च भक्तितः॥ १३ ॥

कलशे विष्णुमाराध्य दीपं प्रज्वाल्य यत्नतः।
सायं प्रातश्च विधिवत्स्तोत्रमेतत्पठेत्सुधीः॥ १४ ॥

सर्पिषा हविषा वाऽपि संयावेनाथ भक्तितः।
दशांशमानतो होमं कुर्यात्सर्वार्थसिद्धये॥ १५ ॥

नमो नमो विश्वविभावनाय
नमो नमो लोकसुखप्रदाय।
नमो नमो विश्वसृजेश्वराय
नमो नमो मुक्तिवरप्रदाय॥ १६ ॥

नमो नमस्तेऽखिललोकपाय
नमो नमस्तेऽखिलकामदाय।
नमो नमस्तेऽखिलकारणाय
नमो नमस्तेऽखिलरक्षकाय॥ १७ ॥

नमो नमस्ते सकलार्तिहर्त्रे
नमो नमस्ते विरुजप्रकर्त्रे।
नमो नमस्तेऽखिलविश्वधर्त्रे
नमो नमस्तेऽखिललोकभर्त्रे॥ १८ ॥

सृष्टं देव चराचरं जगदिदं ब्रह्मस्वरूपेण ते
सर्वं तत्परिपाल्यते जगदिदं विष्णुस्वरूपेण ते।

www.prapatti.com

विश्वं संह्रियते तदेव निखिलं रुद्रस्वरूपेण ते
संसिच्यामृतशीकरैर्हर महारिष्टं चिरं जीवय॥ १९ ॥

यो धन्वन्तरिसञ्ज्ञया निगदितः क्षीराब्धितो निःसृतो
हस्ताभ्यां जनजीवनाय कलशं पीयूषपूर्णं दधत्।
आयुर्वेदमरीरचज्जनरुजां नाशाय स त्वं मुदा
संसिच्यामृतशीकरैर्हर महारिष्टं चिरं जीवय॥ २० ॥

स्त्रीरूपं वरभूषणांबरधरं त्रैलोक्यसंमोहनं
कृत्वा पाययति स्म यः सुरगणान्पीयूषमत्युत्तमम्।
चक्रे दैत्यगणान्सुधाविरहितान् संमोह्य स त्वं मुदा
संसिच्यामृतशीकरैर्हर महारिष्टं चिरञ्जीवय॥ २१ ॥

चाक्षुषोदधिसंप्लावभूवेदप झषाकृते।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ २२ ॥

पृष्ठमन्दरनिर्घूर्णनिद्राक्ष कमठाकृते।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ २३ ॥

याञ्चाछलबलित्रासमुक्तनिर्जर वामन।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ २४ ॥

धरोद्धारहिरण्याक्षघातक्रोडाकृते प्रभो।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ २५ ॥

भक्तत्रासविनाशात्तचण्डत्व नृहरे विभो।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ २६॥

क्षत्रियारण्यसञ्छेदकुठारकर रैणुक।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ २७ ॥

रक्षोराजप्रतापाब्धिशोषणाशुग राघव।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ २८ ॥

www.prapatti.com

भूभारासुरसन्दोहकालाग्ने रुक्मिणीपते।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ २९ ॥

वेदमार्गरतानर्हविभ्रान्त्यै बुद्धरूपधृक्।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ ३० ॥

कलिवर्णाश्रमास्पष्टधर्मर्द्ध्यै कल्कि रूपभाक्।
सिञ्च सिञ्चामृतकणैश्चिरं जीवय जीवय॥ ३१ ॥

असाध्याः कष्टसाध्या ये महारोगा भयङ्कराः।
छिन्धि तानाशु चक्रेण चिरं जीवय जीवय॥ ३२ ॥

अल्पमृत्युं चापमृत्युं महोत्पातानुपद्रवान्।
भिन्धि भिन्धि गदाघातैश्चिरं जीवय जीवय॥ ३३ ॥

अहं न जाने किमपि त्वदन्य-
त्समाश्रये नाथ पदाम्बुजं ते।
कुरुष्व तद्यन्मनसीप्सितं ते
सुकर्मणा केन समक्षमीयाम्॥ ३४ ॥

त्वमेव तातो जननी त्वमेव
त्वमेव नाथश्च त्वमेव बन्धुः।
विद्याधनागारकुलं त्वमेव
त्वमेव सर्वं मम देवदेव॥ ३५ ॥

न मेऽपराधं प्रविलोकय प्रभो-
ऽपराधसिन्धोश्च दयानिधिस्त्वम्।
तातेन दुष्टोऽपि सुतः सुरक्ष्यते
दयालुता तेऽवतु सर्वदाऽस्मान्॥ ३६ ॥

अहह विस्मर नाथ न मां सदा
करुणया निजया परिपूरितः।

www.prapatti.com

भुवि भवान् यदि मे नहि रक्षकः
    कथमहो मम जीवनमत्र वै॥ ३७ ॥

दह दह कृपया त्वं व्याधिजालं विशालं
    हर हर करवालं चाल्पमृत्योः करालम्।
निजजनपरिपालं त्वां भजे भावयालं
    कुरु कुरु बहुकालं जीवितं मे सदाऽलम्॥ ३८ ॥

न यत्र धर्माचरणं न दानं
    व्रतं न यागो न च विष्णुचर्चा।
न पितृगोविप्रवरामरार्चा
    स्वल्पायुषस्तत्र जना भवन्ति॥ ३९ ॥

क्लीं श्रीं क्लीं श्रीं नमो भगवते जनार्दनाय
सकलदुरितानि नाशय नाशय
क्ष्रौं आमारोग्यं कुरु कुरु
ह्रीं दीर्घमायुर्देहि देहि स्वाहा।

अस्य धारणतो जापादल्पमृत्युः प्रशाम्यति।
गर्भरक्षाकरं स्त्रीणां बालानां जीवनं परम्॥ ४० ॥

शतं पञ्चाशतं शक्त्याऽथवा पञ्चाधिविंशतिम्।
पुस्तकानां द्विजेभ्यस्तु दद्याद्दीर्घायुषाप्तये॥ ४१ ॥

भूर्जपत्रे विलिख्येदं कण्ठे वा बाहुमूलके।
संधारयेद्गर्भरक्षा बालरक्षा च जायते॥ ४२ ॥

सर्वे रोगा विनश्यन्ति सर्वा बाधाः प्रशाम्यति।
कुदृष्टिजं भयं नश्येत्तथा प्रेतादिजं भयम्॥ ४३ ॥

मया कथितमेतत्तेऽमृतसञ्जीवनं परम्।
अल्पमृत्युहरं स्तोत्रं मृतवत्सत्त्वनाशनम्॥ ४४ ॥

॥ इति श्री अमृतसञ्जीवनस्तोत्रं सम्पूर्णम्॥



www.prapatti.com